# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा–नवम्बर/दिसम्बर–२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्री-२, सेमेस्टर-३** | **प्रश्नपत्रम् - ६** | **गुणाः - ७०** |
| **विषयः - धर्मशास्त्रम्** | **कोड - CC-2.3.6** | **समयः - ०३-०६** |
| **दिनाङ्कः - ३०.११.२०१६** | **ग्रन्थः - मनुस्मृतिः पञ्चमषष्ठाध्यायौ** | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ निम्नलिखितेषु श्लोकेषु द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

(१) *स तानुवाच धर्मात्मा महर्षीन् मानवो भृगुः ।*
*श्रूयतां येन दोषेण मृत्युः विप्रात् जिघांसति ॥*

(२) *पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।*
*राजीवान् सिंहतुण्डाश्च सश्ल्कांश्चैव सर्वशः ॥*

(३) *न मांसभक्षणे दोषो न मद्ये न च मैथुने ।*
*प्रवृत्तिरेषा भूतानां निवृत्तिं तु महाफला ॥*

**प्रश्नः २ कस्याप्येकस्य सविस्तरम् उत्तरं लिखत । ०८**

*(१) मांसभक्षणविधिं प्रतिपादयत ।*
*(२) जननमरणनिमित्तम् अस्पृश्यत्वं विवेचयत ।*

**प्रश्नः ३ द्वयोः टिप्पणीं लिखत । ०४**

*(१) भक्ष्यमत्स्याः ।* *(२) भक्ष्यपञ्चनखाः ।*
*(३) अभक्ष्यक्षीराणि ।* *(४) अभक्ष्यपक्षिणः ।*

**प्रश्नः ४ निम्नाङ्कितेषु पञ्चप्रश्नानां लघूत्तराणि लिखत । ०५**

(१) *मनुस्मृतेः पञ्चमाध्याये कति श्लोकाः ?*
(२) *मृत्युः कान् जिघांसति ?*
(३) *हव्यकव्ययोः कौ मत्स्यौ भक्षणीयौ ?*
(४) *कान् भक्षयित्वा द्विजातिः पतति ?*
(५) *गुरोः अन्त्येष्टिं कृत्वा शिष्यः कति रात्रेण शुद्ध्यति ?*
(६) *रजस्वला स्त्री कथं शुद्ध्यति ?*
(७) *दशाह्नेन कः शुध्येत् ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ५ निम्नलिखितेषु श्लोकेषु द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

(१) *द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम् ।*
*प्रोक्षणं संहतानां च दारत्राणां च तक्षणम् ॥*

(२) *मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ।*
*चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ॥*

(३) *नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाऽप्युपोषणम् ।*
*पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥*

**प्रश्नः ६ कस्याप्येकस्य विस्तरेण उत्तरं लिखत ।** **०८**

*१. यज्ञपात्राणां शुद्धिः कथं भवति ।*
*२. स्त्रीणां के के धर्माः ।*

**प्रश्नः ७ एकस्य टिप्पणी लेख्या ।** **०२**

*१. जलशुद्धिः ।* *२. भूमिशुद्धिः ।*

**प्रश्नः ८ द्वयोः लघूत्तराणि देयानि ।** **०२**

*(१) चरूणां शुद्धिः केन भवति ?*
*(२) धान्यवाससां शुद्धिः केन भवति ?*
*(३) शंखश्रृङ्गाणां शुद्धिः केन भवति ?*
*(४) स्त्री केन कर्मणा स्वर्गे महीयते ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९ निम्नलिखितेषु श्लोकेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

(१) *अग्निहोत्रं समादाय गृह्यं चाऽग्निपरिच्छदम् ।*
*ग्रामादरण्यं निःसृत्य निवसेत् नियतेन्द्रियः ॥*

(२) *आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ।*
*भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्धते ॥*

(३) *धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।*
*धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥*

**प्रश्नः १० कस्याप्येकस्य विस्तरेण उत्तरं लिखत ।** **०८**

*(१) वानप्रस्थनियमान् प्रतिपादयत ।*
*(२) भिक्षाटनविधिं प्रतिपादयत ।*

**प्रश्नः ११ द्वयोः टिप्पणी लेख्या ।** **०४**

*(१) मधुमांसादिवर्णनम् ।* *(२) आत्मनो ध्यानम् ।*
*(३) प्राणायां प्रशंसा ।* *(४) परिव्राजकः ।*

**प्रश्नः १२ पञ्चानां लघूत्तराणि देयानि ।** **०५**

*(१) कति ऋणानि ?*
*(२) कानि यतिपात्राणि ?*
*(३) कियन्तः धर्मलक्षणानि ?*
*(४) कियत् कालं भैक्षं चरेत् ?*
*(५) भिक्षालाभे किं न कुर्यात् ?*
*(६) प्राणायामैः किं दहेत् ?*
*(७) कति आश्रमाः ?*

=०=